SRI TARA MA MISSION
कर्मण्येवाधिकारस्ते

Sri Tara Ma Mission
Sri Ma Vanasthali Ashram, Behind Municipal Commissioner's Bungalow,
Off Ghodbunder Road, Patlipada, Thane (W) 400607,
Maharashtra INDIA 91-22-25861810
divinelove@sritaramamission.org www.sritaramamission.org

# श्री तारादेवी अष्टकम्
# (śrī tārādevi aṣṭakam)



प्रसन्नवदने देवि प्रेमाश्रमवासिनि ।
प्रेमरूपे प्रेमदाये तारा माते नमोऽस्तुते ॥ १ ॥

*prasannavadane devi premāśramavāsini|*
*premarūpe premadāye tārā māte namo'stute||1||*

शुभ्र वस्त्र प्रिये देवि सुप्रभे सुखदे शुभे ।
सुकन्ये शुभदे रम्ये तारा माते नमोऽस्तुते ॥ २ ॥

*śubhra vastra priye devi suprabhe sukhade śubhe|*
*sukanye śubhade ramye tārā māte namo'stute||2||*

कलियुग वरदे देवि प्रेमामृतवर्षिणि ।
सुस्मित वदने देवि तारा माते नमोऽस्तुते ॥ ३ ॥

*kaliyuga varade devi premāmṛtavarṣiṇi|*
*susmita vadane devi tārā māte namo'stute||3||*

प्रेमप्रिये प्रेम हृदये पवित्रे परिशुद्धे ।
शिवरूपे शक्तिरूपे तारा माते नमोऽस्तुते ॥ ४ ॥

*premapriye prema hṛdaye pavitre pariśuddhe|*
*śivarūpe śaktirūpe tārā māte namo'stute||4||*

श्वेताम्बरधरे देवि मन्दस्मित सुभाषिणि ।
प्रणतोऽस्मिन् पादपद्मे तारा माते नमोऽस्तुते ॥ ५ ॥

*śvetāmbaradhare devi mandasmita subhāṣiṇi|*
*praṇato'smin pādapadme tārā māte namo'stute||5||*

आनन्दवारिदे देवि सर्वानन्द प्रदायिनि ।
भक्तप्रिये ज्योतिरूपे तारा माते नमोऽस्तुते ॥ ६ ॥

*ānandavāride devi sarvānanda pradāyini|*
*bhaktapriye jyotirūpe tārā māte namo'stute||6||*

दीनबन्धो दयासिन्धो अभीष्ट वरदप्रिये ।
अन्नपूर्णेश्वरि देवि तारा माते नमोऽस्तुते ॥ ७ ॥

*dīnabandho dayāsindho abhīṣṭa varadapriye|*
*annapūrṇeśvari devi tārā māte namo'stute||7||*

सर्वसंकट नाशिनि सर्व दुःखनिवारिणि ।
करुणा कटाक्षे देवि तारा माते नमोऽस्तुते ॥ ८ ॥

*sarvasaṅkaṭa nāśini sarva duḥkhanivāriṇi|*
*karuṇā kaṭākṣe devi tārā māte namo'stute||8||*

॥ इति श्री तारादेवी अष्टकम् संपूर्णम् ॥

*|| iti śrī tārādevi aṣṭakam sampūrṇam ||*